## Отшельник и мышь.
(Хитопадеша 4,6)

अस्ति गौतमारण्ये महातपा नाम मुनिः।

tapas *n* - жар, аскетизм, покаяние, мучение;

तेनाश्रमसंनिधाने मूषिकशावकः काकमुखाद्भ्रष्टो दृष्टः।

saṃnidhāne *adv.* – поблизости от ч.-л.;
śāvaka *m* – детеныш;
bhraṣṭa p.p. *от* (√bhraṃś) – падать, выпадать;

ततो दयालुना तेन मुनिना नीवारकणैः स संवर्धितः।

dayālu – сострадательный, участливый;
nīvārakaṇa *m* – зерно дикого риса;
saṃ√vardh I Ā.– вырастать; *caus.* вскармливать, заботиться;

तं च मूषिकं खादितुमनुधावन्बिडालो मुनिना दृष्टः।

anu√dhāv I P.– бежать, преследовать;

पश्चात्तपःप्रभावात्तेन मुनिना मूषिको बलिष्ठो बिडालः कृतः।

tapaḥprabhāva *m* - сила аскетизма, волшебная сила;

स बिडालः कुक्कुराद्बिभेति। ततो ऽसौ कुक्कुरः कृतः।

√bhī (bibheti III P.) – бояться;

कुक्कुरस्य व्याघ्रान्महद्भयम्। तदनन्तरं स व्याघ्रः कृतः।

tadanantaram *adv.*– вскоре после этого;

अथ व्याघ्रमपि तं मूषिकनिर्विशेषं पश्यति मुनिः।

nirviśeṣa *n* – сходство, подобие;

अतः सर्वे तत्रस्था जनास्तं व्याघ्रं दृष्ट्वा वदन्ति।

अनेन मुनिना मूषिको ऽयं व्याघ्रतां नीतः।

vyāghratā *f* – тигриная сущность;
vyāghratāṃ nītaḥ – превратил в тигра;

एतच्छ्रुत्वा स व्याघ्रः सव्यथो ऽचिन्तयत्।

savyatha – опечаленный;

यावदनेन मुनिना जीवितव्यं तावदिदं मम स्वरुपाख्यानमकीर्तिकरं न पलायिष्यते।

yāvat … tāvat – до тех пор, пока; когда – тогда;
svarūpa *n* – природное свойство, настоящая натура;
ākhyāna *n* – повесть, рассказ, повествование;
akīrti *f* – позор, стыд, бесчестие;
akīrti-kara – постыдный, не делающий чести;
√palāy X. P.– бежать, исчезать;

इति समालोच्य मुनिं हन्तुं समुद्यतः।

samā√loc I Ā. – рассуждать, думать;
samud√yam I P. - начинать, готовиться, собираться, намереваться, думать о ч.-л.;

ततो मुनिना तस्य चिकीर्षितं ज्ञात्वा पुनर्मूषिको  भवेत्युक्त्वा मूषिक एव कृतः।

cikīrṣita *n* - желание, намерение (des. *от* √kar);

अतो ऽहं ब्रवीमि।

नीचः श्लाघ्यपदं प्राप्य स्वामिनं लोप्तुमिच्छति।

मूषिको व्याघ्रतां प्राप्य मुनिं हन्तुं गतो यथा॥

ślāghya – почетный;
prāp (pra√āp) V. P. – достигать, получать, приобретать;
svāmin *m* – господин, хозяин;
√lup VI P.– причинить вред, разрушить;